
# ११. अश्वस्य स्वामिनिष्ठा ।



मध्याह्नसमयः । सर्वत्र नीरवता । मार्गः अपि निर्मनुष्यः । तदा एव कोऽपि अश्वः मार्गे धावति । तस्य एकः पादः व्रणितः । सः कष्टेन वेदनां सहते । तथापि त्रिभिः पादैः यथाकथमपि सः धावति । तस्य पृष्ठे उपविष्टः अस्ति तस्य स्वामी। तस्य स्वामी शस्त्रप्रहारैः व्रणितः ।

अविरतं धावनेन अश्वः अतीव श्रान्तः जायते। सः वेगेन धावितुम् असमर्थः भवति। अतः मन्दं धावितुं प्रारभते । परं नैव विरमति सः । ''अधुना ग्रामः समीपे एव । तत्र स्वामिनं नयामि संरक्षामि च। परं मार्गे विस्तीर्णः जलप्रवाहः । अधुना किं करणीयम्?'' इति चिन्तयति अश्वः । क्षीणः व्रणितः च अश्वः तम् उल्लङ्घयितुम् असमर्थः । किन्तु समयः अल्पः । कथमपि प्राणान् अविगणय्य सः जलप्रवाहम् उल्लङ्घयति । अपरतीरं गत्वा भूमौ पतति । तेन आघातेन स्वामी अपि भूमौ निपतति । किञ्चित्कालानन्तरं स्वामी संज्ञां लभते । सः अश्वस्य समीपे आगच्छति । स्नेहेन अश्वस्य शरीरं स्पृशति । भूमौ पतितः अश्वः अपि स्वामिनं पश्यति समाधानेन प्राणान् त्यजति च ।



कः एषः नृपः? ज्ञायते वा? सः एव महाराणाप्रतापः । राजस्थानराज्यस्य मेवाडप्रदेशस्य नृपश्रेष्ठः । कः एषः स्वामिभक्तः अश्वः? एषः चेतकः नाम अश्वः । अश्वेषु आदर्शभूतः सः । तस्य स्मृत्यर्थं निर्मितं समाधिस्थलं मेवाडप्रान्ते विराजते ।

धन्यः स्वामी राणाप्रतापः धन्यः च स्वामिभक्तः अश्वः चेतकः ।

**(कविकुलगुरु–कालिदास–संस्कृतविश्वविद्यालयेन प्रकाशितायाः संस्कृतबालसाहित्यमालायाः आधारेण इयं कथा ।)**

## भाषाभ्यासः




**१. एकवाक्येन उत्तरत ।**

१. मार्गः कीदृशः?
२. अश्वस्य पृष्ठे कः उपविष्टः अस्ति?
३. अश्वः किम् उल्लङ्घयति?
४. स्वामी किं स्पृशति?

**२. प्रश्ननिर्माणं कुरुत ।**

१. स्वामी अश्वस्य समीपे आगच्छति ।
२. स्वामी भूमौ निपतति ।

**३. योग्य विभक्तिरूपं लिखत ।**

१. तस्य ____(पृष्ठ) उपविष्टः अस्ति तस्य स्वामी ।
२. तस्य एकः पादः ____ (व्रणित) ।
३. समाधिस्थलं ____ (मेवाडप्रान्त) विराजते ।
४. अश्वः ____ (समाधान) प्राणान् त्यजति ।

**४. आत्मनेपदिक्रियापदानि चित्वा लिखत ।**

**५. माध्यमभाषया उत्तरं लिखत ।**

१. 'पशुपक्षिणः मानवस्य साहाय्यं कुर्वन्ति ।' इति विषये काः कथाः यूयं जानीथ?